इयम् आकाशवाणी

सम्प्रति वार्ता: श्रूयन्ताम्

दिनाङ्क :- 16.09.2024 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री नरेन्द्रमोदी अद्य गुजरातस्य अहमदाबादनगरे अष्टौ सहस्रकोटिरुप्यकाणां विभिन्नानां परियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत्।
- भाजपेति दलस्य वरिष्ठः नेता गृहमन्त्री अमितशाहः अद्य अवदत् यत् केन्द्र-शासित-प्रदेशे जम्मू-कश्मीरे भयोत्पादनस्य पुनरुत्थानं कर्तुं प्रयत्नाः क्रियन्ते परन्तु तत्र अस्माभिः तथा आतंकवादः भूमिसात् करिष्यते यत् पुनरुत्थानं तस्य नैव कदाचित् भवितुं शक्नोति।
- जम्मूकाश्मीरे प्रथमचरणीय-विधान-सभानिर्वाचनस्य प्रचाराभियानमद्य सम्पन्नम्।
- अष्टमस्य भारतजल-सप्ताहःचतुर्विंशत्यधिकद्विसहस्रे श्वारभ्यः नवदेहल्यां आरप्स्यते। राष्ट्रपतिः द्रौपदीमुर्मुः भारत-मण्डपे अस्य कार्यक्रमस्य उद्घाटनं करिष्यति।
- एशियाचैम्पियन-हाकीप्रतिस्पर्धायां भारतेन दक्षिणकोरिया इति दलं चतुर-एकेन इति अन्तरालेन उपान्त्यचक्रे पराजितम्। अन्तिमचक्रे भारतं चीनदेशेन सह स्पर्धिष्यते।

अथ वार्ता: विस्तरेण

प्रधानमन्त्री श्रीनरेन्द्रमोदी हरितविकासस्य

प्रधानमन्त्री श्रीनरेन्द्रमोदी हरितविकासस्य शून्य-कार्बनोत्सर्जनस्य च लक्ष्यं प्राप्तुं भारतस्य प्रतिबद्धतामभिव्यक्तवान्। श्रीमोदी अद्य गान्धीनगरे वैश्विकनवीकरणीयोर्जा-निवेशक-सम्मेलनस्य प्रदर्शन्याश्चापि उद्घाटनमकरोत्, तत्रैव गान्धीनगरस्य महात्मा इति मन्दिरे प्रधानमन्त्री-सूर्यगृह-निःशुल्कविद्युद्-योजनायाः लोकार्पणेन सहैव योजनायाः लाभार्थिजनैः सहापि वार्तालापमकरोत्। प्रधानमन्त्री अवदत् यत् विकासशीलदेशे सति अपि भारतेन पैरिस-मध्ये निर्धारित-जलवायु-प्रतिबद्धता-विषयकं लक्ष्यं नववर्षपूर्वमेव अधिगतम्, प्रधानमन्त्री

अवदत् यत् पी.एम-सूर्यगृह-निःशुल्क-विद्युत्-योजनायाः कारणात् भारतस्य प्रत्येकमपि गृहं विद्युतः उत्पादनं करिष्यति। सम्प्रति यावत् पी.एम-सूर्य-गृह-निःशुल्कयोजनार्थम् एककोटितोप्यधिकजनाः पञ्जीकरणम् अकुर्वन्। एतस्याः योजनायाः अन्तर्गतं त्रिलक्षाधिक-गृहेषु छद्यां सौर-संयन्त्राणि स्थापितानि सन्ति। प्रधानमन्त्री अकथयत् यत् यूनां कृतेपि नवीकरणीयोर्जाक्षेत्रे वृत्तेः पर्याप्तावसराः सन्ति। श्रीमोदिना इदमपि प्रकथितं यत् जलवायु-समर्थक-सिद्धान्तः भारतस्य प्रतिबद्धतायाः प्रमुखः भागरूपेण वर्तते। यत्र च मिशन-लाइफ इत्युक्ते पर्यावरणानुकूलजीवन-शैल्याः पुनः उपयुज्यमान-अर्थव्यवस्थायाः च साकारीकरणमपि सम्मिलितं वर्तते। देशस्य सप्तदश-नगराणि सौर-नगरत्वेन विकसितानि भविष्यन्ति इत्यपि योजनान्तर्गतं वर्तते। श्रीमोदिना कार्यक्रमे अस्मिन् विगतेषु दशवर्षेषु हरित-हाइड्रोजन-सहित-विभिन्न-स्वच्छोर्जा-उत्पादन-क्षेत्रेषु स्वीय-सर्वकारस्य उपलब्धीनामुल्लेखः कृतः। प्रधानमन्त्रिणा सर्वान् हितधारकान् वैश्विक-प्रतिनिधीन् चोद्दिश्य भारतस्य विकास-शील-हरितोर्जा-क्षेत्रे निवेशार्थम् आग्रहः कृतः। अस्मिन् कार्यक्रमे केन्द्रीय-नवीन-नवीकरणीयोर्जामन्त्री प्रह्लादोजोशी स्वच्छोर्जाक्षेत्रे भारतस्य महत्त्वपूर्ण-प्रगतिविषये प्रकाशः अपातयत्। सः अवोचत् यत् भारतेन नवीकरणीयोर्जाक्षेत्रे षडाशीतिप्रतिशतं वृद्धिः उपार्जितास्ति। अस्मिन् कार्यक्रमे केन्द्रीय-नवीकरणीयोर्जा-मन्त्रालयेन भव्यप्रदर्शिन्याः आयोजनं कृतम्। त्रिदिवसीये अस्मिन् कार्यक्रमे प्रायः चत्वारिंशत् सत्राणि भविष्यन्ति। तत्र च नवोन्मेषि-वित्तपोषण-हरित-हाइड्रोजन-सम्बद्ध-भविष्यद्-ऊर्जा-समाधानविषये चर्चा भविष्यति। अवधेयं यत् अस्मिन् कार्यक्रमे चत्वारिंशदधिकशतं देशानां प्रायः दशसहस्रं प्रतिनिधयः भागं गृह्णन्ति।

## गृहमन्त्री अमितशाहः - जम्मूकाश्मीरः

भाजपेति दलस्वय वरिष्ठः नेता तथा गृहमन्त्री अमितशाहः अद्य अवदत् यत् जम्मू-कश्मीरे भयोत्पादनस्य पुनरुत्थानं कर्तुं प्रयत्नाः क्रियतें परन्तु वयं तस्य एवं प्रकारेण सर्वथा नाशं करिष्यामः पुनः कदापि उत्थातुं न शक्ष्यति इति। किश्तवाडस्य पद्देर्-नागसेनी इत्यत्र पूर्वमन्त्रिणः सुनील् शर्मणः समर्थने निर्वाचनसमारोहं सम्बोधयन् सः अवदत् यत् भयोत्पादनस्य पुनरुत्थानं कर्तुं प्रयासाः प्रचलन्ति यतः न्याशनल् कान्फ्रन्स् तथा काङ्ग्रेस्-घोषणापत्रं भयोत्पादकेभ्यः मुक्तेः विषये कथयन्ति।

## भारतजलसप्ताहः

अष्टमस्य भारतजल-सप्ताहःचतुर्विंशत्यधिकद्विसहस्रं श्वारभ्यः नवदेहल्यां आरप्स्यते। राष्ट्रपतिः द्रौपदीमुर्मुः भारत-मण्डपे अस्य कार्यक्रमस्य उद्घाटनं करिष्यति। चतुर्दिवसीये कार्यक्रमे चत्वारिंशद्-देशानां द्विशतं वैदेशिक-प्रतिनिधिभिः सह सम्मेल्य चतुःसहस्रं प्रतिनिधयः भागं ग्रहीष्यन्ति। अस्मिन् कार्यक्रमे एका प्रदर्शिनी अपि भवति तत्र च समुचित-जल-प्रबन्धनाधारिताः विषयाः प्रदर्शयिष्यन्ते। नवदेहल्यां जलशक्ति-मन्त्रालयस्य सचिवः देवाश्री-मुखर्जी अवदत् यत् सुजल-प्रबन्धनात् देशस्य आर्थिकवृद्धिः द्रुतगत्या वर्धिष्यते।

## विराम:

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।

## मिलाद-उन-नवी

ईद-मिलाद-उन-नबी इति पर्वः अद्य देशस्य विभिन्नेषु भागेषु धार्मिक-भावनया आमान्यते। राष्ट्रपतिः द्रौपदीमूर्मुः उपराष्ट्रपतिः जगदीपधनखडः प्रधानमन्त्री नरेन्द्रमोदी च मिलाद-उन-नबी इत्यस्य अवसरे देशवासिभ्यः शुभाशयाः प्रदत्तवन्तः। स्वीये सन्देशे राष्ट्रपतिः मुर्मुः प्रावोचत् यत् पैगम्बर-मोहम्मदेन जनेभ्यः विश्वं प्रेम्णः शान्तेः च संदेशः प्रदत्तः । तस्य शिक्षाः अस्मान् भातृ-भावनया सौहार्दभावेन च सह जीवनं यापितुं प्रेरयन्ति । एकस्मिन् सन्देशे प्रधानमंत्री प्रोदीरितवान् यत् अस्य पर्वणः माध्यमेन समाजे सौहार्दस्य करूणभावनायाश्च संचारो भविष्यति। पैगम्बर-मोहम्मदस्य जन्मदिनम् ईद-मिलाद-उन-नबी-अवसरे पैम्बरस्य जीवनसम्बद्ध-शिक्षाणां विषये विभिन्न-सम्मेलनानि अपि भवन्ति।

## भारतद्वारासाहाय्यम्

भारतेन यागी-झञ्झावात-प्रभावितदेशानां तत्र च म्यांमार-लाओस-वियतनामादीनां कृते मानवीयसाहाय्यं प्रदातुं आपरेशन-सद्भावः आरब्धः। भारतेन प्रभावितदेशानां कृते साहाय्य-सामग्री अपि प्रेषिता। एशियायाः इमे देशाः सम्प्रति महत्याः त्रासद्याः कारणात् भीषण-जलोघेन च पीडिताः सन्ति। विदेशमन्त्री एस.जयशङ्करः अवदत् यत् भारतीय-नौसेनायाः

जलपोतः आई-एन-एस इति विविध-खाद्यसाग्रमी-पूरितः दश-टन-युत-भारेन सह तत्र साहाय्यार्थं प्रेष्यते।

अन्ताराष्ट्रिय-ओजोन-स्तर-

अद्य अन्ताराष्ट्रिय-ओजोन-स्तर-संरक्षण-दिवस: आचर्यते। ओजोन इति पट्टिका प्रतिवर्षं सूर्यत: पृथिवीं प्रति आगम्यमानानां हानिकारक-किरणानां प्रभावात् अस्मान् मुञ्चति इयं ओजोन-स्तराख्या पट्टिका अस्य वर्षस्य ओजोन-दिवसस्य विषयत्वनेन वर्तते- मांट्रियल प्रोटोकॉल इति जलवायोः क्षेत्रे अग्रे आगता: पदक्षेपा: वर्तन्ते।

हरियाणा-विधानसभानिर्वाचनम् –

हरियाणा-राज्ये आगामिनि लोकसभा-निर्वाचने भिवानी-जनपदे आहत्य नवाधिक-द्वि-शतोत्तर-पञ्च-सप्तति-सहस्राधिकाष्ट-लक्षं यावत् मतदातारः निज-मताधिकारस्य प्रयोगं करिष्यन्ति। भिवानी-जनपदस्य उपायुक्तः जनपद-निर्वाचनाधिकारी चत महावीर-कौशिकः असूचयत् यत् मतदातृणां सौविध्याय एतस्मिन् जनपदे एकचत्वारिंशदधिकनवशतं मतदनकेन्द्राणि विनिर्मितानि सन्ति। एतेषु मतदातृकेन्द्रेषु महिलानां कृतेपि चत्वारि केन्द्राणि स्थापितानि। पिंकबूथ इत्येतेषु मतदातृकेन्द्रेषु महिलाधिकारिभिः कर्मचारिभिश्च मतदानं करयिष्यते। उपायुक्तेन सूचितं यत् प्रत्येकस्मिन् विधानसभाक्षेत्रे एकं पिंकबूथ इति मतदानकेन्द्रं स्थापितमस्ति। असौ भणितवान् यत् मतदातृन् आक्रष्टुं एतानि पिंकबूथ इति महिलाभ्यः निर्मितानि केन्द्राणि पुष्पैः फुल्लकैः मालाभिश्च सज्जितानि भविष्यन्ति।

भारतर्तु-विज्ञान-विभागः –

भारतर्तुविज्ञानविभागः अद्य झारखण्ड-राज्याय अतिवृष्टिमालक्ष्य सञ्चेतना प्रख्यापिता। आकाशवाण्या सह सम्भाषयन् ऋतुविज्ञानविभागस्य वैज्ञानिकः आर.के.जेनामणिः सूचितवान् यत् उत्तरीयोडिशा-पूर्वीय-छत्तीसगढ-गाङ्गेय-पश्चिम-वङ्गालेषु अतिवृष्टिः सम्भाव्यते इति।

ट्रम्पहत्याप्रयासः –

पूर्व-संयुक्त-राज्य-अमेरिकायाः राष्ट्रपतिं डोनाल्डट्रम्पमुद्दिश्य स्पष्टतया हननप्रयासः केनचित् अराजक-तत्त्वेन कृतः तस्मिन् काले श्रीट्रम्पः स्वीयगोल्फ-क्रीडा-ङ्गने आसीत्, परन्तु श्रीट्रम्पः तत्र सुरक्षितः अथ च सुरक्षितस्थानं प्रति नीतः। एतस्मिन् प्रकरणे कश्चन भुशुण्डिधारी जनः गृहीतः, मासद्वयात् पूर्वमपि ट्रम्पमुद्दिश्य एकेन जनेन पेसिल्वेनिया-मध्ये तस्य जन-सम्बोधन-काले एतादृशः एव हत्या-प्रयासः आचरितः आसीत्, तत्र च श्रीट्रम्पस्य कर्णः व्रणितः जातः आसीत्। अमेरिकायाः उपराष्ट्रपतिः कमला-हैरिसः एतस्याः दुःखघटनायाः विषये खेदं प्रकटितवती।

।। इति वार्ताः।।